भिनिवेशे ३योगशास्त्रोक्ते चिन्तनविशेषरूपे समाधिभेदे ४भक्तिविशेषे च "ईश्वरप्रणिधानाद्वा" पात० "प्रणिधानात् भक्तिविशेषात्" भाष्यम् । ५अर्पणे ६कर्मणां फलत्यागे च "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" पात० "ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरावर्पणं फलसन्न्यासो वा" भा० ७मनसो विषयान्तरसञ्चाराभावरूपे ऐकाग्र्ये च गौत० ३।२।३६ सूत्रवृत्तिः ।

**प्रणिधि** पु० प्रणिधीयते प्र+नि+धा-कि । १गुप्तचरे अमरः । २अनुचरे च । भावे कि ।३याचने ४अवधाने च मेदि०। काश्यपस्य इन्द्रद्युम्नस्य ५पुत्रभेदे भा०व० २१६अ० ।

**प्रणिपात** पु० प्र+नि+पत-घञ् । प्रणामे हेमच० "तद्विद्धि प्रणिपातेनेति" गीता । [हिते च मेदि०।

**प्रणिहित** त्रि० प्र+नि+धा—क्त । १प्राप्ते २स्थापिते ३समा-

**प्रणी** त्रि० प्रणयति प्र+नी-क्विप् । १कारके २ईश्वरे च "सायन्तनीं तिथिप्रण्यः" भट्टिः ।

**प्रणीत** त्रि०प्र+नी-कर्मणि क्त । पाकेन रूपरसान्यथाभावापादिते १पदार्थे २क्षिप्ते ३निवेशिते ४विहिते च हेमच०। ५यज्ञे संस्कृताग्नौ पु०अमरः । ६यज्ञपात्रभेदे स्त्री मेदि० अग्निपदसान्निध्ये ७मन्त्रसंस्कृतमात्रे "यथाध्वरे वह्निरभिप्रणीतः" भट्टिः । ८मन्त्रसंस्कृतासु अप्सु स्त्री ब०व०। तदाधारपात्रे तु उपचारात् प्रणीताशब्दवाच्यता । "प्रणीतानाम आपो मन्त्रसंस्कृता आहवनीयस्योत्तरतो निहिताः" आश्व०श्रौ०१।१।५ नारा० । "तदापः प्राणयंस्तस्मादापः प्रणीतास्तत्प्रणीतानां प्रणीतात्वम्" शत० ब्रा० १।२।६।२।८।

**प्रणीय** त्रि० प्र+नी-कर्मणि वेदे क्यप् । यस्य मन्त्रेण संस्कारः कृतस्तस्मिन् । लोके तु प्रणेय इत्येव ।

**प्रणूत** त्रि० प्र+णु—स्तुतौ कर्मणि क्त । स्तुते अमरः ।

**प्रणेय** त्रि० प्र+नी-यत् । १वश्ये अधीने २कृतलौकिकसंस्कारे च हेमच० ३प्रापणीये ।

**प्रतक्वन्** पु० प्र+तक—गतौ वनिप् । प्रकर्षेण गतियुक्ते "नभोऽस्ति प्रतक्वा" ता०ब्रा०१।४।२२ "प्रकर्षेण प्रतक्वा स्वावयवैः पांशुभिः सर्वान् धिष्ण्यान् प्रति गन्ता तकतिर्गतिकर्म्मा" भा० ।

**प्रतति** स्त्री प्र+तन--भावे क्तिन् । १विस्तारे । कर्त्तरि क्तिच् वा ङीप् । २वल्लर्याञ्च अमरः ।

**प्रतद्वसु** पु० प्रतत् प्राप्तं वसु धनं येन । १प्राप्तवसुके २विस्तीर्णधने च ऋ० ८।१३।२७।

**प्रतन** त्रि० प्र+"नश्च पुराणात् प्रात्" वार्त्ति० चकारात् त्न, तट् च । पुरातने अमरः ।

**प्रतनु** त्रि० प्रकृष्टस्तनुः प्रा०स०। १अतिस्वल्पे २अतिसूक्ष्मे च

**प्रतमा(रा)म्** अव्य०प्र+आमु तरप् तमप् वा। अत्यन्तप्रकर्षे

**प्रतर** पु० प्र+तॄ-भावे अप् । प्रकर्षेण १तरणे आधारे अप् । २प्रतरणाधारे गोप्रतरशब्दे दृश्यम् । [प्रतर्के तर्कार्थे ।

**प्रतर्कण** न० प्र+तर्क-भावे ल्युट् । वितर्के शब्दर० । घञ् ।

**प्रतर्द्दन** न० प्र+तर्द—भावे ल्युट् । १ताडने । कर्त्तरि ल्यु । २ताड़के त्रि० ३दिवोदासपुत्रभेदे पु० हरिवं० २९अ० । ४इन्द्रोपदेश्यभेदे प्रतर्दनं प्रति इन्द्रेण ब्रह्मविद्योपदिष्टेति वेदान्ते प्रसिद्धम् ।

**प्रतल** न० न० प्रकृष्टं तलम् । १पातालभेदे मेदि० । प्रकृष्टं तलमस्य । २विस्तृताङ्गुलिके पाणौ चपेटे पु० अमरः ।

**प्रतान** पु० प्र+तन—घञ् । १विस्तारे २ऋषिभेदे च तस्य गोत्रापत्यम् इञ् । प्रातानि तद्गोत्रापत्ये बहुत्वे तु तस्य उपका० लुक् । प्रताना इत्येव । ३तन्तुयुक्ते अलाबूत्रपुषादौ । "गुच्छगुल्मन्तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव वा" मनुः । "प्रतानास्तन्तुयुक्तास्त्रपुषालाबूप्रभृतयः" कुल्लू०।

**प्रतानिन्** त्रि० प्र+तन—णिनि । १विस्तीर्णे २विस्तृतलतायाम् स्त्री ङीप् अमरः ।

**प्रताप** पु० प्र+तप—घञ् । १कोषदण्डजाते नृपादेः तेजसि अमरः । २तापे ३अर्कवृक्षे च राजनि० ।

**प्रतापन** पु० प्रतापयति तप—णिच्—ल्यु । १नरकविशेषे २तापके त्रि० शब्दरत्ना०। भावे ल्युट् । ३पीडने शब्दर०। कर्त्तरि ल्यु । ४विष्णौ पु० । "प्रकाशात्मा प्रतापनः" विष्णु स० "सूर्य्यप्रभृतिभिर्विश्वं प्रतापयतीति प्रतापनः" भा०

**प्रतापवत्** त्रि० प्रताप+अस्त्यर्थे मतुप् मस्य वः । १प्रतापयुक्ते २स्कन्दानुचरगणभेदे पु० भा० श० ४६ अ० ।

**प्रतापस** पु० तपसि साधु अण् प्रकृष्टस्तापसः प्रा०स०। १प्रकृष्टतापसे२शुक्लार्कवृक्षे च अमरः ।

**प्रतास्** अव्य० प्र+तम बा० णिव—स्वरादि । ग्लानौ मनोरमा ।

**प्रतारक** त्रि० प्र+तॄ—णिच्-ण्वुल् । १वञ्चके २धूर्त्ते च ।

**प्रतारण** न० प्र+तॄ—णिच्—भावे ल्युट् । १वञ्चने अन्यपदार्थस्य अन्यथारूपेण ज्ञापने । युच् । प्रतारणाऽपि तदर्थे स्त्री । "प्रतारणासमर्थस्य विद्यया किं प्रयोजनम्" उद्भटः ।

**प्रतारित** त्रि० प्र+तॄ—णिच्—क्त । १वञ्चिते त्रिका० ।